This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥ श्रीगणेशाय नमः॥ नत्वा रामं गणाधिपतिं समीरतनयं शिवम॥ रत्नद्योत
महं वक्ष्ये वालानां हितकाम्यया॥१॥ अथ वरकन्ययोः मैत्री विचारः॥
अश्विन्यार्द्रा शतभिषा फाल्गुणी चोत्तरा तथा॥ पुर्व भाद्रपदा मुलं ज्ये
ष्ठा हस्त पुनर्वसु॥२॥ पुर्वा फाल्गुणिका चित्रा धनिष्ठा भरणी मृगः॥
पुर्वाषाढा नुराधा च पुष्यो भाद्रपदोत्तरा॥३॥ कृत्तिका रोहिणी स्वाती
मघाश्लेषा च रेवती॥ श्रवणश्चोत्तराषाढ विशाखेत्येक नाडिका॥४॥
अग्रनाडी व्यधे भर्ता मध्य नाडी व्यधे द्वयम॥ अंत्य नाडी व्यधे कन्या म्रीयते
नात्र संसयः॥५॥ रोहिण्यार्द्रा मृगेन्द्राग्नी पुष्यो श्रवण पौष्ण भं॥ अहिर्बु ॥१॥

ध्न्यर्क्ष मेतेषु नाडीदोषो न विद्यते॥६॥ एकर्क्षे चैकपादे च विवाहे प्राणना
शकः॥ एकर्क्षे भिन्नपादे च विवाहे पुत्रपौत्रदः॥८॥ नाडीदोषस्तु विप्राणां
गणदोषस्तु भुभुजां वर्णदोषस्तु वैश्यानां सूद्राणां पोनिरिष्यति॥९॥ इति
नाडीवेधः॥ वध्वा च केतुमरणांत कौणस्त्व नपत्यता नेकादिद्वाद षोसे खेदप्र
स्योः प्रीतिरुत्तमः॥ वर रूपं च मे कन्या कन्यायां नव मे वरः एतत्त्रिकोणकं १५
मासं पुत्रपौत्र सुखावहा॥२॥ इति भमेलकम्॥ हस्तस्वाति मृगाश्विनी २
हरिगुरुः यौस्मानुराधादिति॥ ब्राह्मो रोहिणी चोत्तरा शिभ नर णीपुर्वाशि १५
भनित्रपम॥ ज्येष्ठाश्लेषविशाखमुलवरुणां वस्वग्नि चित्रा मघा कृष्ण १५
गे मुनिभिर्प्रथा रू मवशाः देवाः नराः सक्षसाः॥ स्व गणे परमा प्रीति

KKSU LIBRARY RAMTEK 441 106 M-1335 Dist Nagpur
Checked 2012
Accession No! ~~10272~~ M1335
नांव: रत्नद्योत
पत्रे: 46
1
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

||२|| मध्यमा देव मर्त्ययोः॥ मर्त्य राक्षसयोः मृत्युः कलहो देव राक्षसाः॥ राक्ष
सी तु यदा कन्या पुरुषो मानुषो भवेत॥ अशांसपंत्रिभिर्यद्वै स्तत्रैक्काविद्य
वा भवेत्॥ इति गणाः॥ अश्वैौ शतभिषाश्विन्यौ रेवती भरणी गजौ॥ अग्नि
पुष्यौ अजौ यात्तौ सर्पौ च मगरोहिणी॥ आर्द्रा मुलत था स्वानौ मूषवौ
भगपैत्रकौ॥ आदित्याहि च मार्जारौ आषाढो विस्मुश्च मर्कटौ॥ अहिबु
ध्न्यार्यमागावौ मित्रज्येष्ठे मृगौ तथा॥ वसुषाश्व पदौ सिंहौ हस्तस्वाती च
माहिषौ चित्राविशाखा व्याघ्राख्या अभिजित्त विश्वे च व मुकौ॥ रिभ्रये
नि पुपुर्वी तौ पुरुषाश्च परस्त्रियः॥ श्वैनं व भूरगं मेषवानारं सिंहदन्तिनं ||२||
गोव्या व्र मुषमार्जारं महिषा श्वश्वचशत्रवः॥ इति योनिः॥ जन्माद्व यासे

पदष्टौ विपञ्चक्षेमा च पाया च युग्मा च कष्ठा मैत्राति मैत्रेति नवैव तारास्युर्नी
रुमाद्वै परिवर्तनेन॥ जन्मत्रियं च सप्ताख्या ताराने ष्टा रफलप्रदा॥ भीरुभा
य च सप्तत्रि वर्जयेदिह तारका॥ इति तारा॥ कर्कलिमी नाविप्रशाभेषसिंह
धनुर्नृपवः कन्या मृगो वैश्यः शूद्रा पुम्मतु लाघटः॥ वर्णश्रेष्ठा तु जा नारीत
स्य भर्ता न जीवति यदि जीवति चेद्भर्ता विदेशे निरतः सदा॥ इति वर्णः॥ नाडी
भेदे गुणाश्चाष्टौ स्य शञ्जिकु कैकर गुणागणा मैत्रेषु चतु पीभौ प्रकीर्ति
ताः॥ त्रप स्ताराव श्ये प्रोक्ता वर्णे एकः प्रकीर्तिताः॥ इति ये कोटा त्रिंशद्गुणाः॥
वरस्य भास्करबलं कन्यायाश्च गुरोर्बलं द्वयोश्चन्द्रबलं ग्राह्यं विवाहे
नान्यथा भवेत॥ जन्मन्यर्के १ विवाहे यदि भवति नराणां मृत्युमायाति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३॥ नुनम॥मृत्युस्थेकन्यकनां७भर्त्तानिहनवेतद्धन८संस्थेतथैवविनस्पेर
वित्तनाशो॥सुखभवनगते४बंधुनाशो॥चिंतात्तमे॥पोक्ताशुद्धिरवराशेस्तु
कसमुनिवरैस्तस्यशुध्दादिशुद्धि॥रतिरविवसम॥नष्टात्मजा९ध्व न
वती२विधवा३कुशीला४पुत्रान्विता५घरस्ता६शुभगा७वियुत्रा८स्वामी
प्रिया९विगतकोशा१०धनागमश्च११वंध्याभवेत्सुर१२गुरूःक्रमसोवि
वाहे॥अष्टवर्षीभवेद्गौरीनवववर्षीचरोहिणी॥दशवर्षीभवेत्कन्याअत ऊर्द्धं
रजस्वला॥गौरीगुरूबलंदेयारोहिणीभास्करस्यचकन्याचंद्रबलंया
स्यंशकुनाद्वाशुभंभवेत्॥रजकस्यगहेगत्वानिर्भयंचाऽत्रतंत्रिसियेत॥या ॥३॥
दशंवचनंश्रुत्वाताद्दशफलसमाप्नुयात्॥रजस्वलायदाकन्यागुरूशुद्धि

नलभ्यते॥अष्टमेपिप्रकर्त्तव्योविवाहोत्रिगुणार्चनात्॥संप्राप्तेकादशेन
वीकन्यायेनविवाहिता॥मासिग२मासिपदाद्ध्यापितायिवतिशोशितम्॥
माताचैवपिताचैवज्येष्ठभ्राता तथैवचत्रयस्तेनरकंयातिदष्ट्वाकन्यारजस्व
ला॥गुरूशुद्धिर्विशुद्धिर्कीर्तिनाद्दशवत्सरात्॥द्वैकादशवर्षेतुअग्रेसंप
तिसूरयः॥सिंहेगुरौसिंहलवेविवाहोनेष्टो२थगोदोत्तरतश्चपावत्॥
भागीरथ्यायाम्यतटेहिदोषो३नात्रदेशेतपनेपिमेषे॥नीचस्थेवक्रेसं
स्थेप्यतिचरसागतेवाअवध्दास्तगेवासंन्यासोदेवपात्राव्रतनिपमविधिक
रीवे[illegible]चवस्तुदीक्षामौजीवंधोगणानांपरिनयनविधिःवास्तुदेवप्रतिष्ठा
वर्जीसद्भिःप्रयत्नात्त्रिदशपतिगुरौसिंहराशिस्थितेचः॥उद्यानचुअव्र

३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥ तवंधदीक्षाविवाहयात्राचवस्तुःप्रवेशो॥तउगकपात्रिदशप्रतिष्ठासह
स्यतौसिंहगतेनकुर्यात॥अतीचारगतेजीववक्रराशिंनैवचेस्युनः॥खुप्त
संवत्सरोत्तेयःगर्हितःसर्वकर्मसु॥मेषेवृषेझषेकुंभेपघतीचारगोगुरु
भतत्रकालस्वोपस्यादित्याहभगवान्पम॥अतीचारेत्रिपक्षंस्याद्वक्रेमा
सद्दद्वयंतथा॥व्यासेनकथितंतस्यान्यवाजवस्तुपरंपरात॥अथगुर्वादित्य
स्यप्रसंगांतत्रथाराह॥एकराशिगतौस्यातौदेवाचार्यदिनेश्वरौ॥गुर्वा
दित्यसविज्ञेयंतत्तगुर्वस्तुसंशकः॥अस्यावादवसिष्ठसंहितायां॥रासिन ॥५॥
भत्रभेदाभ्यांमक्षस्येप्यशुभप्रदो॥गोदानागीरथीमध्येपत्नतःपरिव
र्जयेत॥अपरंचगुरुसंहितायाम॥गुरुक्षेत्रेगतेःभानुक्षेत्रेगतेगुरुःगु

र्वादित्यसविज्ञेयःसिंहस्येवास्मतिर्यथा॥इतिगुरुविचारः॥पुत्रोद्वाहात्परंपुत्री
विवाहोनऋतुत्रये॥नकुर्यात्द्रुतमुद्वाहान्मंगसेनाथमंगलम॥मजादिर
सिद्वयभानुमोगाख्यउत्तेवसुःशिशिगेवसंतः॥यीक्षमश्चववीद्वशरश्चेत
द्वेमंतनामाकथितोत्रवृद्धैः॥इतिप्रसंगात्तरितुज्ञानम॥चूडाव्रतंचापिवि
वाहतोव्रताचूडाचनेष्टापुरुषत्रयान्तरे॥वधुप्रवेशःसुतविनिर्गमो
वराभासत्तोवाद्वविभेदनःशुभः॥विवाहःचैककन्यानांषण्मासाभ्यान्तरेप
दि॥अशंसपंत्रिभिर्वर्षेस्तत्रैकाविध्रुवाभवेत॥जन्ममासेजन्मभेच
नचजन्मदिनेबुधैः॥ज्येष्ठमासेनज्येष्ठस्यविवाहोनकदाचनः॥त
योरेकतरेज्येष्ठज्येष्ठमासेपिकरयेत॥इतिपुत्रायुत्रौविचारः॥अथ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घ९चंद्रश्रियंकुर्यान्मनस्तोकृद्वितीयके३तृतीयेच व्यनप्राप्तिस्याउच्चतुर्थे
॥५॥ ४कलहागमः॥पंचमे पत्नानवृद्धिश्चषष्ठेदसंपतिरुत्तमाःसप्त७
मेराजसन्मानंमरणंचाष्टमेतथा॥नवमे९धर्मलाभंचदशमेम्मा
नसेप्सितम॥एकादशेमहालाभं११द्वादशेहानिरेवच॥अयनाम्प्रा
घादोषापवादः॥योगस्पेहेमकूरराशस्यचघान्यभिदोशंस्वचतदस
मरिांतिप्पिवारयोश्च॥तारावलायंलवरााप्प्यगांचरासेदघाछिजा
र२पकूराकंसुचिनाडिकायाः॥इतिचंद्रवलं॥अथविवाहनक्षत्रमासोधु ॥५॥
वानुराधाम्रगमूलरेवतीकरंमघास्वातिरदूषरोगराः॥रवेरमीनाम
करादिवरगहेरेग्रहेमंगलस्रक्रूनृगीदशाम्र॥नाकं१वेतं६नप९वं

कोा१२शकोा१५दाघ१८घटोनखरचंद्रर्क्षभानुसंयोगसरभल्कास्तुशेष
के॥पूर्वोक्तनुल्पसंत्याज्यःशुभकर्मप्रकारयेत॥मरुणेचाग्निभूपाल
चौरमृत्युरजोशानि॥कलिहानिर्दशोद्वाहेदोषास्त्याज्याःसदावुधैः॥गुरौच
नाधिपेशुक्रेसवीर्येलग्नकेन्द्रगे॥दशदोषाःविनश्यंति॥यथाग्नौतूलराश
यः॥इतिदशदोषाः॥अथवेधः॥अश्विनीपूर्वफाल्गुण्यापाभरणीचानुराध
या॥अभिजिच्चापिरोहिण्यांकृतिकाचविशाखया॥मृगश्चोत्तरषाढ्यापूर्वा
षाढतथार्द्रयापूनर्वसूचमूलेनततथापुष्यश्चज्येष्ठया॥धनिष्ठयातथाश्ले
षामघाचापिश्रवणेनच॥रेवत्युत्तरफाल्गुण्याहस्तेनोत्तरभाद्रपद॥स्वात्याश
तभिषाविष्ठाचित्रयापूर्वभाद्रपद॥विष्कम्भ्येताशिवजीशिविवाहेभानिवे

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विद्धं॥रविवेध्वे च वैधव्यं कुजवेध्वे कुलक्षयः॥बुधवेध्वे भवेद्वंध्याप्रव्रज्या गु

रुवेध्वतः॥अपुत्रा शुक्रवेध्वे च सौरे चंद्रे च दुःखिता॥परपूरुषरत्ता राहौ केतौ स्व

क्षंदचारिणी॥इति वेध्व॥लत्तामासवर्के दर्शयातं च कुरुजां गलेरकार्गलं ॥६॥

वकास्मीरेवेध्वं सर्वत्र वर्जयेत॥अथ दग्धा तिथिः॥द्वितीया च नमी मेषु चतु

र्थी वषकुंभयोः॥मेषकर्कयोः षष्ठी कन्यामिथुनाचाष्टमी॥दशमी वृश्चि

के सिंहे द्वादशी मकरे तुले॥एता स्तुतिथयो दग्धाः शुभे कर्मणि शिववर्जिता॥

इति दग्धा तिथि॥चित्रा विशाखाशततारका शिवनिज्येष्ठा भरणी पैशिवभा

चैतु क्षयं हित्वा प्रसस्ताः कृत्तै लवेदिका प्रदान नं करणं नमणं पादिकम॥ ॥६॥

अथ लग्नप्रकारो यते॥पक्ष २ चंद्रा म्बरं १० चंद्र १ पुक्ष २ रामा ३ [illegible] षिवि ५ मा

र्गशा ५ ऋतु ६ पंचा ५ षि ४ राम ३ स्पु:मध्याने मासदै वहि॥शात मे को शितं कं

र्थी म ध्यान्ह त्रिगुशां स्य्येत॥मध्यमादौ ३ नित्ताख्या पाषड्घुतै भी गमाहरेत॥

अग्रागुह्येरसरुद्रकं ६।११॥१।तर्जन्यामुनिभानु दकृ ७।१२।२ मध्यमात्र योद

शाब्धाग्नि १३।४।३ विषाग्नह सिंचु १४।नामिकातिथिवाराः दशारुश्वासंख्या

१५।५।१ गुलिगाति क्रमात्॥एतद्दं वि जानीयात् दराज्य च द्विगरांय लम॥उ

तिरात्रि घटीज्ञानम॥सुर्योदयावात घटीनि ब्राम्हके रुता विंशति भिश्च ल

घारवे भं तो लध्व मितं च गरां पत द्क्षतो भानिवदंति संत॥उदयाधागताना

साताशामर्द्धेन संख्ययासू र्य्यरिक्षां भवेद्दृतैं ते न लग्न स्पनिर्णय:॥प्रतिल

ग्नज्ञानम॥तररो व्योमन मध्यस्य वि सम संख्या न गोनितम॥भषवृंनव मि

र्भक्तं लध्वं दराज्य मको विदु:॥इतिरात्रि घटीज्ञानम॥तिथि गुणितं रजनीय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८॥

रिमानं यमरहितोशितयक्ष विभिन्नमन॥वाराशशांक१५विभाजितलब्धंप्र
तिवासरं चंद्रोदयचास्तम्॥इतिचंद्रोदयचास्तस्तानम॥रामः३कुवेदैः४जस
धिसुः४।१२मैत्रैः वारोब्धिभिः५।४।यं चक्रराब्धि५।४भिश्चवारोश्ववेदैः
५।४५सरपंचरामै५।३५क्र मोक्रमाम्मोवतुस्यादिमानं॥मीनेमेषेपसा७स
प्ततथाष्टौवयवक्रूभयोः८मिथुने मकरेदिवस्या१०षे षेकादशास्मृताः॥हि
वृक्षे८ध्वर्मे९सुतो५दय११वक्रमिसू१त्रिदशाराजगुरोयदिवासिते॥यदि
शुभंसुमंतांसमुपैतिनष्टुमनफलंनितरामविवर्द्धते॥दोचौरांशतमपिएं ॥८॥
तिसोमपुत्रःकेन्द्रस्योद्विगुरामयहायदशपमूर्तिः दैत्येज्योद्विगुराभिदयुनर्व
तीयाब्रांचार्यो समयतिलक्षमप्यवृशपम॥प्रागोद्गमः दिनशिशुस्त्रितयं

शितस्यात्पश्चाद्दशाहमिहयंचदिनानिवृद्धः प्राक्नकृच्चमेववक्रप्यितोत्रवशिष्यमु
रेज्येजीवस्तुपक्षमपिसद्धशिशुःविवर्ज्यः॥शुक्रोगुरुःप्राक्परश्चवालोविंध्दे दशा
वंतिषुसप्तरात्रम॥हूनेयुवंगेमधु८ पंचसेषयुदेशेत्रिदिनंवदंति॥सार्द्धमासाघ
कंपुर्वैसर्वदाउदितोसितः॥सार्द्धमासद्वयंसोम्ये३स्तंयातिभगोसुतःमासान्
[redacted] नयवकंपश्चात्सर्वदाउसमोदितः॥दशिरोदिग्नवास्तंस्यातत्तातथ्यंसर्वदावु
ध्वैःतिथिवारेंदुतक्षत्रंलग्नतारादयोग्रहाःनोलिंधाःसुयरिनयेगोधूलिःसमयंयदि॥
यदानास्तंगतोभानुःगोधूल्यापूरितंनभःगोधूलिकःसविज्ञेयःसेघाधूलीमुखास्मृ
ताः॥इतिगोधूलिः॥कुलिकोक्रांतिसाम्यंचमूर्तौषष्ठाष्टमेशशिःपंचगोधूलिकत्या
ज्यंस्वमेदाघासुभावहाः॥उर्द्धस्तिश्रोस्तिरस्तिश्रोम ओमीनलिवेदुषैः॥चंद्रसूर्यस
मायोगेक्रांतिसाम्यंनिगद्यते॥मीनवन्यकयायुक्तोमेषसिंहेनसंगतःमकरेराव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८॥ षःक्रान्तिश्चायोधिमिथुनेन च॥ कर्केनवश्चिकोवि द्वौवेध्यश्चतुस्कं भयोः॥ क्रां
तिसाम्यकृतोद्वाहेनजीवतिकदाचनः॥ इतिश्रीमद्दीवेदगंगारामविरचितेवहद्दल
घोतेविवाहप्रकरणम्॥ अथवधूप्रवेशः॥ हस्तत्रयेवस्त्रयुगेमघापायुष्योध्वमि
त्राश्रवणोत्तरेषु॥ मूलानुराधाहस्तरेवतीषु स्थिरेषुलग्नेषुवधुप्रवेशः॥८॥ च
तुष्पंचषट्सौम्यात्रिषगपगतेष्वरे॥ अथशुभसंयुक्तेशुभदाश्चद्विरागमे॥
अथद्विरागमनम्॥ चात्रियुग्मंहयोमैत्रंश्रुतियुग्मंकरत्रयंपुनर्वसुद्वयंपुष्यामु
लंचाप्युत्तरात्रयंविषमोवत्सरोमासोमार्गोमेषश्चफल्गुनःवारासौम्याग्रहाणां
चवधूसंचारणोशुभः॥ अस्तंगतेभृगोःपुत्रेतथासन्मुखदक्षिणेनचजीवेनिरं ॥८॥
सेचनैवसंचारयेद्वधूः॥ वत्सभृग्वंगिरात्रीणांभरद्वाजस्यवैपुनःवसिष्ठकरप

पानांचनदोषोशुक्रसंभवः॥ एकग्रामेचतुष्कोणेदुर्भिक्षेराजविग्रहे विवाहे
तीर्थयात्रायांशुक्रदोषोनयश्यति॥ रेवत्यादिषुरिक्षेषुयावत्सुप्तावस्थितेविधुः॥
तावच्छुक्रोभवेदंधःप्रतिशुक्रंनदुष्यति। द्वितीयेमप्रतेभर्त्ताचतुर्थेपरगामि
नीपंचमेसंवत्सरेनारीदुर्भगाभवतिध्रुवमसश्रुरंहंतिषष्ठमेवर्षेशशूदशमे
तथासंप्राप्तेद्वादशेवर्षेयतिहंतिनसंशयः॥ पितृगारेसंभवस्याकदावि
कुचयुग्मयोयतिशुद्धिर्नवाशुक्रेदिनेशस्तेद्विरागमे॥ गुर्विण्याबालके
नायिनववध्वादिद्विरागमे॥ यदुमेवंनगच्छतशुक्रे [illegible] सन्मुखदक्षिणे॥ स
मशुक्रेस्त्रियंहंतिवध्जीवसुतयतिंगुरुलगोतोद्वपोहंतिप्रदाग्रखिलसमं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गलम॥ सन्मुखे स्वमरं हंति दक्षिरोह निकायकरकः॥ पृष्ठ तो वामतश्चैव
॥९॥ शुक्रो प्रोक्ता शुभावहाः॥ अथ चंद्र राकर्मः॥ आदित्यमग हस्तौ अयौ स्य मैत्रा श्विनी
युच गोविन्द वसु मुले चंद्रं गसंपत्ति प्रदायकः मेषोपुर्ण पुष्यमकर्क सत्रिकोशोवु
तिष्ठ ति राहु पुर्वी सुकाछा सुमासे मार्गादि भिस्त्रिभि यास्ये वंदक्षि राग वर्त्तेने ष्ठं सम्मु
खवामगः॥ इति त्रिमासिक राहु॥ इंद्रा वायुपमे २ रुद्रे ४ ती याप अग्नि ६ शशि ७ राक्षसे ८
यमार्द्ध मुदितो राहुः भ्रमत्ये वंदिगाष्ठके॥ इति यामार्द्ध राहु॥ त्रिमासिकं तनगादो मासि ॥८॥
कं घंगवं भैशियामार्द्ध पुष्ठ कार्येषु राहु रेवं विचिंत्य येत॥ ० इति श्रीमद्विवेदगंगारा
मविरचिते वहद्रत्न घोते द्विरागमन प्रकरणं द्वितीयम॥ अथ नवसंगमः॥ वा

स्य अयरोहि रणीह स्तमैत्र चित्रोत्तरासु च संवासवे षु सुमदं पयोर्न वसंगमे॥
ओजराश्यंशगे चंद्रे लग्ने युग्मवचीक्षिते यवीतो पुग्मतिष्यो सुलग्ने कामस्त्रियं॥ पुं
ग्मह सुर्यभौमार्या स्त्री ग्रहौ शशिभार्गवौ नपुंसकौ सौम्य सौरि सिरोमात्रं विधुंतुदः॥
रतिनवशंगमः॥ आहाराचार चेष्ठभियादशाभिः समन्वितो स्त्रीपुंसमुपेयपातां तत्प्रो
पुत्रपितादशाम अथ गर्भ प्रसंगात्स्त्री पुंसे प्रतान्वयो॥ गुर्भिरणीनाम शुश्कादिति थिभि
र्मुनिभि र्युतम॥ रामै भौ गे सुता द्वा भ्यां सुतश्चैवे केन खेन्यकम॥ रवि भौमगुरोः पुत्रं सौ
मेशुक्रो वुढे अन्यथा॥ शनैश्चरे गर्भ यातं मध्यवी वारजं फलम॥ रवि गैरीसप्ता भौ
मः तिथिरिक्ता यदा भवेत॥ पृष्ठ कोश्चोत्तरस्य श्च चयर जातं वदेत्त दा॥ रोगीयतिवृताडुः
खी पुत्रि रणी भोगभागिनीयति वृता क्लेश युक्ता च सुपि वारादि मुक्रमात॥ अश्विनी

(9)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोहिणीचित्रास्वातीयैस्मातयोत्तरा॥अस्तुस्नानेशुभाश्रेत्ताहस्तपुष्येंदुवासवः॥
०१ इतिऋतुस्नानम॥श्रवणाःशाकूरःपुनर्वसुत्तिरित्तौमंचसपुष्पकोमगः॥रविभूसु
तजीववासराकथितापुंसवनादिकर्मसु॥तृतीयेगर्भसंस्कारंमासियुंसवणंभवे
त॥चतुर्थेमासिवाकार्यंसीमंतचाष्टमेतथा॥सीमंतलग्नादेकोपिक्रूरःपंच
मस्थश्च मःहंतिसीमंतिनीसोपितरूभैंजनशंसपः॥उत्तराचयरोहिणंपासौम्य
पननरेवतीसूतिकावरिणातास्नायाहस्तमैत्राश्विनीपुच॥स्नातायप्रसूताप्य
सुतावृध्येनस्नातावर्वेछ्याभ्रगुनंदनेनशनौचमृत्युःयपहानिसोमेपुत्रार्थलाभो १०
रविजीवभौमे॥इतिप्रसूतास्नानम॥कृत्वापातंपितापुत्रंसचौलस्नानमाच
रेत॥उत्तराभिमुखोभूत्वानद्यांवादेवखातके॥पातकर्मचकुर्वीततस्मिनयातम

श्रीगणेशायनमः॥ाने हूतके॥दानंदेयंचविप्रेभ्योयथाविधिक्षेदात्मनःश्रियं
रात्रौयदीप्रतेदानंतत्सर्वंनिःफलंभवेत॥स्मतान्तरेपिलिखितंव्यासस्यवचनंप
था॥ग्रहणोद्वाहसंक्रांतौयात्रादौप्रशवेषुच॥दानंनैमित्तिकंतेयंरात्रावपिनदुष्य
तियावन्नाक्षिन्नतेनालंतावन्नाप्नोतिसूतकम॥क्षिन्नेनालंततःपश्चात्सूतकंतुवि
धीयते॥अथगंडांत॥अश्विनीमघमूलादौत्रि३वेद४नव९नाडिकारेवतीसर्प
संक्रान्तेमास१२रूद्र११रसा६स्तथा॥मूलादौपितरंहंतिद्वितीयेमातरंतथा॥तृ
तीयेधननाशंचचतुर्थेचशुभावहा॥अषाढापादायोःतद्विंवप्रुवर्गेद्वितीयप
६॥धननाश तीयपोहंतितथात्मानंचतुर्थगः॥सर्प्यांसेप्रथमेराज्यद्वितीयेतुधन
नपःतृतीयेजननीनाशःचतुर्थेसरपांपितुः॥रेवत्यान्तेववाहिकैकाचमूलादौव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥११॥ ष्ठि कार्द्धपं च प्रभक्त मूलमित्येतत्तत्र जातं शिशुं त्यजेत ॥ तत्र शान्तिः प्रकर्तव्या
स्वस्य वित्तानुसारतः ॥ मूलजासश्वसुरं हंति सर्पजा सश्रुरां गनाः ॥ ज्येष्ठजास्वप
तिं ज्येष्ठं देवरं तु द्विदैवजा ॥ रक्षात्मजा सूर्यपभौ दिनाद्विधो ॥ नद्वातिथिर्वी
रूराम्मूलसार्पभैः ॥ यस्माद्युभूतिर्भवतीह घोगे विवागरगासा परिवर्ज्जनी
या ॥ शाक्रे पञ्चेन्द्र गंडांतः ५ मूलस्याद्यंतसरा घकम ॥ मासानां नवकं सार्पे
त्यज्येत्संदर्शने शिशोः ॥ नक्षत्रतिथिभिर्लग्नैः गंडांतस्त्रिविधोस्मृतम ॥ नव
पंच ७५॥ चतुर्थान्ते द्वे कार्द्ध वष्ठिकाभितम ॥ नक्षत्रं मातरं हंति तिथिर्जं पित
रं तथा लग्नोत्स्यं वा लकं हंति तस्मा अंगनामुत्सृज्येत ॥ तृतीयादशमीध्ग ॥११॥

स्मासनी भौमार्क संयुता कृस्मा चतुर्दशी रात्रौ मूलसंलरतकुलं म
याता सेज्येयवै मार्गे स्वर्गे भाद्र्याखिमाघक ॥ पौषे साउर्ज्ये चैत्रे सु भूत
लेनात्र शंसयः ॥ विवाहादौ भवेन्मृत्युः जातके कुलनाशनम ॥ यात्रादौ
सर्वनाशस्यात्कार्यनाशोऽप्यकर्मणि ॥ अथ यातकस्यमस्तकज्ञानम ॥
मेषे चापमृगेन्द्रयो यदि शिशुः प्राचीशिरो जायते गो कन्या मकरे षु दक्षि
णाशिरा जातो भवेन्निश्चितम ॥ मीने वृश्चिक कर्किणो यदि तदा कौवेर
मूर्द्धि भवेत्कुंभाख्ये व्वा ष्ठ युग्मयो यदि ततः पश्चाद्धृतः सौमत्तः ॥ मेष कुली
रतुलालिवृषैः प्रागात्तरतो गुरुसौम्य ग्रहेषु ॥ पश्चिमतत्सु वृषेन निवासो
दक्षिणाभागकरौ मृगसिंहौ ॥ मेषवृश्चिकयो भौमशुक्रौ वृषतुल्याश्चि

य:॥वृष्वःकन्यामिथुनयोप्रोक्तः वृर्कस्यचंद्रमा॥स्यान्मीनध्वनिनोजी
॥१२॥ वःशनिर्मकरकुंभयोःसिंहस्याधिपतिःसूर्यराशिनाथामुदाहृता॥जी
वांसंस्कृतमर्कजेज्ञितिसुतेद्वंनवंश्रीत्तगैकाष्ठापंनदिंढरवौससि
मतेतन्चैकक्षिस्योद्भवम॥रम्यचित्रयुतंनवंचभगुजेजीवेदृढंमंदिरं
चक्रस्यैश्चयथोपदेशरचनासामातुपूर्वीवदेत॥अथोच्चमाह॥मे
षेरविःवृषेचंद्रोमकरेचमहीसुतःकन्यायांशेहिराणीयुत्रोगुरुःकर्केभृ
षेभृगुःशनिस्तुलायामुच्चस्तुमिथुनेसिंहिकासुतःउच्चात्सप्तमगानी ॥१२॥
चाराशौचापदचांशके॥कुलीरगौशुक्रवागीशौभत्रिषाभौममा
स्करौ॥चंद्रोवैश्योवृषःशूद्रोयतिर्मंदोत्यजेन्जने॥अथसूतिकाव

स्थानिरणीय:॥वसंतऋतुस्यूलमभक्तमग्निकृतंभव्यंदृढंस्फाटितम॥ता
म्रेस्यान्मरीहेमयुक्तिरजताव्यर्का तु मृत्तापसी॥रक्तस्यामभयोसित
उरुराहरित्यीतासितास्यामस्ता॥याद:षट६त्रि३नवान्यगा११श्चशुभदा
सौम्येरतोनैर्ऋत्ये रा॥अथसूतीपशावस्त्रीज्ञानम॥लग्नेलग्नेशयाश्चेवाजा
वतःसंतिखेचराः॥चंद्रलग्नान्तरस्थोवाप्रसूतानिकृष्टस्त्रियः॥प्रकारा
न्तरेपि॥मीनेमेषेतथाप्येकाचत्वारोवृषकुंभयोः॥अन्येलग्नेभवेत्नीशि ३
वारः५चध्वनुकर्कयो:॥अथरंगसावित्रीज्ञानम॥यावग्रहेचविधवासध्ववा
सौम्यखेचराः॥वृषश्चंद्रोकुमारीस्यातगरूःसूर्योप्रसूतिकाम॥अम्यग्रहे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१३॥

नवेद्धद्दासग्नसम्यग्विचारयेत्॥ अथदष्टिः॥ पादैकदष्टिर्दशमेत्रि
नीयेद्वियादद्दष्टिःनवपंचमेच॥ त्र्यादद्दष्टिश्चतुरष्टके च संपूर्णादष्टि
समसप्तके च॥ अथारिष्टविचारः॥ एकपापोऽष्टमगःशत्रुपुत्रशत्रु
वीक्षितो वर्षांतरमारयतिनरंप्रसूतसुखारसोयेनपीतोपि॥ पापा
भौमारविःकेतुःक्रूरोराहुःशनिर्बुधः॥ चंद्रो गुरुभृगुसौम्यौसत्याहुःशो
नकादयः॥ षष्ठाष्टमे च चंद्रे सद्यो मरणाय पापसंदष्टः॥ अथाभिमु
भद्रको वर्षैर्मिश्रैस्तदर्धेन॥ तृतीये नवमेक्रूरःक्रूरग्रहनिरीक्षिते भात ॥१३॥
रस्तस्यजातस्यनजीवतिकदाचन॥ द्वादशेरिपुभावेचपदिपायग्नवो

नवेत्॥ तदामातुर्भयंविपाच्चतुर्थेदशमेपितुः॥ अथमैत्रीविचारः॥ मि
त्राणिसूर्यात्शशिभौमजीवाःसूर्येन्दुजौसूर्यशशांकजीवाः॥ आदित्यशुक्रौ
रविचंद्रभौमबुधार्कजौचंद्रजभार्गवौच॥ सितासितौचंद्रमसोनकश्चि
द्बुधःशशीसौम्यसितौरवीन्दू॥ रविन्दुभौमारविजस्वमित्रामित्रारिशेव
स्तुसमप्रतिष्ठा॥ अथारिष्टभंगः॥ केन्द्रे१।४।१२॥ धर्मे९सुतपूर्णाभगो
गुरुः।११॥ वीर्यवानंचभृगुजोरथवावर्क्षीपूर्वरिष्टमपिनाशयतदासं
प्यकारश्मिवभास्करोदयः॥ पक्षेसितेभवतिजन्मपदिक्षयापाम्॥ क
स्मैतथानिशमदाशुभदष्टिमूर्तिंचंद्रमारिपुदविनाशगतोपिय

(13)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नादापत्सुरक्षति धितेवशिशुं निहंती॥ राहुत्रिषष्ठलाभोस्प ११।१२ लग्ना

॥२४॥ न सौम्यैर्लिरिक्षितः सघः नाशपति सर्वदुरितं मारुतरूवतूलसंवातम्॥ अ

थराजयोगः॥ जीवेवादैत्यपूज्योप्युरगरा

पतियः केन्द्रगोवात्रिकोणेचंद्राद्यत्रस्यात्तथा

स्यान्मेननसमयेजस्य चैकोध्वनीस्यात्तस्या

नां द्वैतत्र मंत्रीवहहप्रभनवं सौर्पनस्यागपु

न्होसर्वेस्युस्तत्रराज्यो कटगज मदसंसिक्त

भूमरक्षेस्यात्॥ देवाचार्यदिनेश्वरौक्रियग

तौमेषूरशोन्नानिमंजःपुष्योऽभागिवसौ

सू	चं	मं	बु	बृ	शु	श	ग्रह
चं मं बृ	सू बु	र चं बृ	सू शु	र चं मं	बु श	बु शु	मित्रः
शु श	०	बु	चं	बु शु	र चं	चं मं र	शत्रुः
बु	मं बृ शु श	शु श	मं बृ श	श	मं बृ	गुरू	समः

॥२४॥

न्यसीतक्रिररागायस्यप्रसूतस्थितौ नूनंदिग्निजयप्रयान समयेसैन्यैरिया

व्याकुला॥ चिंतामूढ एतीति कागतिरहोसर्वे सहायस्थितैः॥ अथ महान

क्षत्रफलम्॥ यस्मिन्नक्षे भवेत्सूर्यस्तत्रादौत्रीणि३मस्तके॥ मुखेत्रयं

प्रदातव्यो स्कंधे वाहौ करेद्वयम्॥ पंचोरस्थश्चनाभिस्थ्यामेकं गुह्येत्रयं

मतम्॥ पादयोर्षट्प्रदातव्यो क्रमात्तत्फलमीरितम्॥ अथास्यापुश्चररा

द्वयेध्वनिरतौ गुह्येपरस्त्रीरतौ नाभावल्पध्वनी ध्वनीच हृदये पाण्योव्य

यीतस्करदुःखी दोक्षत योरथाशयुगले क्रिडान्विताः परिणतौ वक्त्रे मानधना

न्वितो नरयतेस्यान्मस्तके श्रेनरः॥ तिथिश्चवारश्चनक्षत्रयोगंचैत्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२५॥ दिमासंयुभावादिवर्षैर्भेवादिलग्नेमुनिबर्हिपुत्तंसतंविभागात्प्रति
शोधमायुः॥इतिआयुशाध्वनम॥अथशनिचक्रम॥शिरोयत्रशनिस्थि
तोभवतिचवक्त्रेसदायोजयेत॥वाहौदक्षिणकेततोभचतुरःखदयादयोवि
न्यसेत॥यंचोरस्यचतुर्यभान्यपिकरेवामेषट्पार्श्वयेत्रयंपुगमेलोचनयोर्द्व
योगुदगतंजन्मर्क्षयुक्तंफलम॥मुखेहानिजयोवाहौभ्रमोश्चाद्योध्वने
त्रिदि॥दुःखवामेप॰कैराज्यंनेत्रेसौख्यंमतिगदेमुखादिगुह्यपर्यंतंयाव
च्छिन्नानिवर्तितम॥तावत्संख्याकधान्यंगेबुन्यसेत्सुधीः॥पूर्वचक्रक्रमेणा ॥२५॥
नाफलंबूहियथातथा॥इतिशनिचक्रम॥अथनामकरणम॥पुनर्वसू
द्वयेहस्तत्रयेमैत्रेद्वयम.गेसमूलोत्तरध्वनिष्ठायांद्वादशीकादशेदिने॥अ

नानौगुरौस्थिरेलग्नेवासनाम
मत्रायिशुभेयोगेवारेबुधशशांकयोः॥मैत्रत्रयेहरिद्वंद्वेविष्विद्वंद्वेदितिद्वये॥
कृतिःशुभा॥अथशिशुनिष्काशनम॥मैत्रत्रयेहरिद्वंद्वेविष्विद्वंद्वेदितिद्वये॥
स्वातीहस्तोत्तराषाढेपुष्यार्यमहपेषुच॥सिंहत्रयेवृषेलग्नेमासयोस्त्रिचतु
र्थयोः॥यात्रातिथौचनिष्क्रामःशिशुर्नैवार्कभौमयो॥अथनववस्त्रपरिधा
नम॥हस्तादिपंचकेश्विन्यांधनिष्ठायांचपूषणि॥गुरौशुक्रेबुधेवारेधार्यं
त्वीर्नवाम्बरम॥पुंसांपुनर्वसुद्वंद्वेरोहिण्युत्तरभेषुच॥इंदुराजीवशुक्राणां
वाराशकुनमुत्तमम॥क्रूरेप्यंतरवारेषुयदुक्तंकर्मसिद्धयेत॥अथनवान्नभो
जनम॥नवान्नभोजनेग्रासंवस्त्रप्रोक्तमशेषतः॥वाराश्चिकौसूर्यसोमौनक्ष
त्रेश्रवरोमगः॥अथान्नप्राशनम॥अथान्नप्राशनेपूर्वासर्पार्द्रावरूणोयमः॥

15

१६॥ नक्षत्रेषुपरित्याज्यंवारे भौमार्कनंदनौ॥शुक्लपक्षेशुभतिथौसंग्राह्यंशु
भचंद्रमा॥मासेषुच्चाषढमेषुंसावंचमेसप्तमेस्त्रिय॥रवौलग्नेकुलीवरिग
तनयेधितगद भाकशनौवातथाविःकूशशाशिनिमिश्रोठनरतः॥बुधेज्ञा
नीभोगीघुसनसिचिरायुसुरगुरौसदायन्यायूरीभवतिचनरःशत्रुदहनः॥
यतोधिविलग्निग्यशिस्यभ[illegible]गानिसर्वतःशस्त्राणिचैवशास्त्राणिततःयस्य
मुलक्षणम॥यपमंयप्यश्यतेवासौरिं॥मानास्वयंतथा॥जीविकातस्यवाल
स्यतेनैवतुभविष्यति॥अथचूडाकरणम॥वासानांजन्मतोकार्योचौसमा
वसरांतरात॥सौम्यायनेनास्तगतयोरमरासुरमंत्रिणो॥मगादिशशिव ॥१६॥
दसस्थेरवौस्यादुत्तरायने॥तथाककींदिषट्केर्कस्थेतंतंदक्षिणायनेण॥

द्विवोत्तरेच्चदेवातारजनीदक्षिणायने॥विवाहादौशुभेकार्यीनकार्यदक्षि
णायने॥मुराणंमार्गशीर्षेथिकर्त्तव्यंचयुयत्नतः॥मासानांमार्गशीर्षोहंइति
विस्मुसम्मतंमुखात॥दस्त्राद्वितीज्यचंद्रेंदुपौसमभानिशुभान्यथाचौलकर्मा
णिहस्तर्भत्रीणित्रीणिचविस्नुभात॥सोमेसौम्येगुरौशुक्रौशुरकर्मणि
शस्यते॥रविशुद्धौग्रहकरणंरविगुरूशुद्धौवृतोद्वाहो॥क्षौरंताराशुद्धौशे
षंचंद्रश्रितंकर्म॥जन्मसपद्विपक्षेमप्रत्यस्तिाधननैधनभित्रंपरमित्रंच
वर्जयेतत्रिशाराखूद्विभिः७॥शानोमातरिगर्भिन्याचूडाकार्येनकारयेत॥पंच
मासादधःकूर्यात्तदूर्ध्वनैवकारयेत॥पंचवर्षावधौरेववालकस्यैषनिश्चयः॥
नडतरैदेसयाप्तेगर्भचिंतानकारयेत॥अथकर्णवेधः॥श्रुतित्रये३दितिद्वंद्वे

(16)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८॥ श्रेनहस्तत्रयोत्तरे भगो विश्वियुगेमूले पुष्याश्विसे मृगवासरे ॥ द्विश्व भाद्रेवे
स्येकस्तिवेध्य शुभो भवेत चैत्रयोवेलरि स्वायं वर्षं च पुगलं त्यजेत ॥ शिशोर
यात दत्तसमातुरूसं गसर्थि रांपास स्यावेध्ययेत्क्रूरशूख्यादिगुराशूत्रयम॥
क्रूरीरचुरवेः श्वायान विशेदग्रजन्मनोतां दद्याविलयंयातियुग्योवम्भचयु
रातना॥ष्यात्कुंभमयीशुभिवेधनेमंगलयुदा॥ राजसी चायसी चाधिवृस्त्भ
त्रविशाशुभः॥ अथ व्रतवंधः॥ अथानादद्यमेवर्षे जन्मतो वाग्रजन्मनाम॥
रास्तांमेकादशेमौंजीवंधनेद्वादशेविशाम॥ माघे च फाल्गुने चैत्रे वैशा ॥१८॥
खे ज्येष्ठयोस्तथा॥ एते वृशुभ मासेपुकर्तव्यं स्वोपनायनम॥ गोचराष्टक
वर्गाभ्यां गुरुशुद्धिर्नलभ्यते॥ तदोपनयनंकार्यं चैत्रे मीनगते रवौ॥ शुक्लप

क्षेद्वितीयाचतृतीयापंचमीतथाएकादशीचदशमीद्वादशी व्रतवंधने॥ क्षौरं च
व्रतवंधं च विवाहं भेत थैव च गलग्रहे न कुर्वीत यदीच्छेत्पुत्रजीवितम॥ त्रयोदश्या
दिचत्वारि सप्तम्यादि दिनत्रयं चतुर्थी चैकतः प्रोक्ता अष्टावेते गलग्रहा॥ आचा
र्यकाव्यसौम्यानां वाराशस्ताशशीनयोः॥ वारो मध्यफलौ ज्ञेयौ त्यक्तौ निंदितावितरौ व्रते॥ अथ मौंजीवंधनम॥
सौम्येयोश्मेवैस्मवेवासवारव्येहस्तस्वातीत्वाष्ट्रपुष्याश्च भेषु॥ रिक्षे व्रास्नेमेरवला
वंधमोक्षौ सस्मर्यं तेनूनमाचार्यवर्ज्यैः॥ त्रिकोणकेन्द्रगाः सौम्याः पापाश्च त्रिषडा
यगाचंद्रेषष्ठरहिते शुभदाव्रतवंधने॥ अथ अकालच्छिः॥ पौषादि चतुरो मासा
प्राक्तावच्छिरकालजा व्रतंचूडाविवाहं च वर्जयेत्सप्तवासरात॥ पौषे दिनत्रयं वर्ज्य

17

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१८॥ माघेचैव दिनद्वयम्॥ फाल्गुरोदिनमेकं स्याच्चैत्रे च घटिकाद्वयम्॥ वहुलषेत्रिष
त्रं स्यादस्यषष्ठे चवामरान॥ यत्रवर्षे दनध्यायितेनैव सहगच्छति॥ अथयात्रा॥ हस्ते
दुदित्याश्वि निविस्मुमित्रांत्यस्यवसूढ्वयात्रानिष्ठ यदायोक्ता आर्द्रियं चत्रिसप्रसू॥ नमं
देन्दुदिने याचीनो वृज्येदृक्षिरो गुरू॥ सिताकयोर्नोयुती चीनो दीचीं तारयोरवि॥
मीनौ लिंमे रवक लग्नो शुदिनान्तमात्रं गोकीढ्वकामुकधेनुध्वयि चार्द्धे रात्रे॥ स्त्रीयुग्मे
सिंहमकरे ग्रुसमस्तरात्रं वारयुवति सततं मुनयो वदंति॥ नवारदोषाय भवन्ति रात्रौ ॥१८॥
विशेषतो भौमशनैश्वरार्क अग्रं पतिय स्यविलासिनीनां कष्टवारास्व निःफ
लाप॥ ज्येष्ठाजपादार्द्रव भवर्यमश्नीशितु पुर्वतः॥ शतभिसर्व द्वाराशिमित्राश्वी

न्यार्कमानिच॥ रेंद्रेयौ प्राप्तःपावजत्याद्वा मोवैधृतौयमेव्रुस्नवष्टौ चवारुरायाम्॥
कौवेर्यांचध्रुवोधृतेविकुभवन्व्याद्वा तोशूलगंडातिगंडिका॥ विरुद्धसंज्ञकाह्येते
युक्तं वैधृतियातयोः॥ विरुद्धःसंज्ञकायोगास्तेने ष्टा सर्वकर्मसु॥ अथयाद विशेषे
नत्यक्तावैधृतपातयोः॥ उतियोगशूलम॥ भद्राकर्कचयोगं चतिव्यतंयमबंटकाम॥
दग्धातिथिं मांतंचंकुलिकं चविवर्जयेत॥ एकादश्यां चतुर्थ्यां च शुक्ले यश्चेयरेदले॥
अष्टम्यां पूर्णिमायां च विष्टौपूर्वदलेस्मृता॥ दशम्यां च तृतीयायां कृस्मेयश्चेयरेदले॥
सप्तम्यां च चतुर्दश्यां विष्टिः पूर्वदलेस्मृता॥ अथवासविचारः॥ मेषो १ भरककर्क४ मिथु
नेध्वलि ८ सिंह५मीनौकुं१२ मेषु११ चायज० मजेतौ लिश्व राग रगा६ स्थुः॥ खमत्यैनागनग
रीरू मसः प्रयातु विष्टिः फलान्यपि ददाति हतत्र लोके॥ आकाशोयमरूं रायाता पे१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२॥ सेव्यास हूयिशी॥भम छेव्याह्नहूयेरात्रिविष्वंविष्टिलक्षरगम॥दिवाभद्रायदा
रात्रौरात्रि भद्रायदादिवातत्र भद्रानदोवस्पात्साभद्राभद्रदायिनी॥असितेसर्पि
णीज्ञेया सिते चैव तु वृश्चिकी॥सर्पिण्या च मुखं त्याज्यं वृश्चिक्या पुच्छमेव च॥कृ
ष्णपक्षे चतुर्दश्यां शकुनिम्पश्चिमे दले॥चतुः पदश्च नागश्च अमावास्या दलद्वये॥
शुक्ले प्रतिपदा चादौ किंस्तुघ्नकरणं स्मृतम्॥स्थिराण्येतानि चत्वारि स्थिरकार्येषु
सोभना॥शुक्ले प्रतिपदा चांते ववाख्यकरणो भवेत्॥ववबालवकौलवश्च तैतिलो
गरसंज्ञकः॥वाणिज्यविष्टिसंख्या स्यातां सप्तैते चरसंज्ञका॥तिष्यर्द्धे भुस्थि ॥१२॥
नासर्वे नामतुल्यफलप्रदा॥भुजाष्टमी सिते पक्षे गे ३ षिन्नूढ सितेत्तरे॥

अस्तरैस्ति पयोज्ञे यः स्वरैः यामतष्यादिशगम॥रतिकरराणि॥षष्ठी
चद्वादशी रिक्ता चाष्टमी दर्शी संज्ञक॥यात्रायां निंदिता सर्वा शेषा कल्या
नदायिनी॥तिथ्यंकेन समायुक्तो वाराको यदि जायते॥त्रयोदशाककर्कचोयो
योस्तेनिंदा सर्वदाशुभे॥इति कर्कचयोगः॥मघा सूर्ये विशाखे सोमे भौमे चाद्रा
नक्षेगुरौ॥बुधे मूलं विधिशुक्रे यमघंटः शनौ कर॥इति यमघंटः॥मासां
ते दिनमेकं तु तिथ्यंते घटिकाद्वयम्॥घटिका त्रितयं भांते यत्नतः परिवर्जयेत्॥
मत्व १४ र्क १२ दिग्व १ स्तु ८६ वेद ४ पक्षे शर्कन्मूरुत्तीकुलिका भवन्ति॥दिवा
निरैकैः अप्पयामिनीषु तेगर्हिता कर्मशुसोभनेषु॥इति कुलिकयोगः॥हस्तसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२०॥

र्यैम्ृ गः सोमेवारे भौमेत थ्याश्विनी॥बुधे मैत्रं गुरौ पुष्ये रेवती भृगुनंदने॥
रोहिणी सूर्यपुत्रे च सर्वसिद्धिप्रदायिका॥इति नक्षत्रवारे सिद्धियोगः॥गुरु
पुष्ये विवाहे च प्रयाणे शनिरोहिणी॥भौमाश्विनी प्रवेशे च यत्नतः परि
वर्जयेत्॥त्यज रविमनुराधा चंद्रवारे च वैश्वं शतभिषमथ भौमे चंद्रजे
चाश्विनीषु॥मृगशिर गुरुवारे सर्पसंज्ञे च शुक्रे रविसुत दिन हस्ते मृत्यु
योगा वदंति॥इति नक्षत्रवारे मृत्युयोगः॥नन्दा शुक्रे बुधे भद्रा शनौ रिक्ता
कुजे जया॥गुरौ पूर्णा तिथौ ज्ञेया सिद्धियोगा प्रकीर्तिताः॥इति तिथिवारे सि
द्धियोगः॥नंदा सूर्ये मंदे च भद्रा भार्गव सोमयोः॥बुधे जया गुरौ रिक्ता श ॥२०॥
नौ पूर्णा च मृत्युदा॥इति तिथिवारे मृत्युयोगः॥कुयोगाः तिथि वारोत्थाति थि

भोत्थाश्च वारजा तुरगां वंगे खशे ष्वेव वर्ज्यास्त्रितय यातव्या॥अथ जो जन्म १ धी
पूर्व मी ५ वित्ता १ रि ६ रव १ श्री ३ स्वरा ७ ध्य ४ व ८ गायं ११ यमो १२ घात चंद्रः॥नयष्ठा
रयाचाविरोध्यामथ्या दौ विचिंत्यः विवाहादिके नैव चिंत्यः॥शशा १ नाग ८ शैला ७
करांगा ६।२ त्रि ३ वेदा ४ करी रदिक्ति १ सिवा ११ यां ३ वा ५ सूर्य १२ तस्याविवाहे त था
वैशुभे वर्जनीयाश्चीयात्कामिनी नां बुधे घात चंद्रः॥तिथिर्यं च गुणा कार्यो वार
ऋक्ष समन्विता रामे भोगे द्विबभिश्च पक्षे व पृथिवी तले चंद्रस्य वसतिज्ञेया या
ता ले नाशुभः क्वचित॥स्वर्गे चंद्रे भवे लक्ष्मी मृत्यो गर्भामवाप्नुयात॥याता ले
मरणं विंघा देवं चंद्रस्य संस्थिति॥इति चंद्रस्थिति॥मेषे च सिंहे धनपूर्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥ भागेवषेचकन्यामकरेचयाम्यां॥युग्मेतुलेकुंभदिशाचपश्चिमेकर्कालि
मीनोदिशिचोत्तरस्यात॥प्रसौमेवसिंहेहरौ॥युद्धकारीवृषेकर्कटेतौलिके
श्वेतसिद्धिः॥धनुर्मीनयुग्मेसपीतो॥घलक्ष्मीमजेकुंभकन्याशशीस्यामम
त्युः॥क्रूरराभगरादोषंवारसंक्रान्तिदोषंकुलिकतिथिजदोषंयोगिनीशूलदो
षं॥रविशितकुजदोषंयामायामार्द्धदोषहरतिशकुलदोषंचंद्रमादक्षमग्रमः॥
शिरप्रदेशोगुरा३पंच५जन्मखे६त्रदृ८यथेरुदयोद्रि७पश्चोररिष्फा१२ख८
वेदे४चवसेद्वयादौकरोदिगीसौ१॥११॥चविध्वन्देहे॥शिरस्थापीलाभोविध
स्यागभागेशुखेहृत्प्रदेशोचयष्टेचशून्यम॥पदेयुद्धकारीकरेशर्वलाभंप्र ॥२१॥

कुर्याच्छशीमानवानांफलंच॥प्रवासनर्वधर्मरंगाजयहास्यरतिस्तथा॥क्रीज
निद्राखभुक्तिश्चज्वराकंपोन्ययस्तथा॥राशिभोगाद्दशांशाविभाद्द्वादशायने॥
भुक्तेवस्थाचशीतांसोस्वनामशादशांफलम इति चंद्रमाफलम॥महीयतेपो
गवसात्फलोदयोद्विजन्ममस्लफलैश्चजायते॥सतस्करादेशराकुनयप्रभावतोय
नस्यशोषंचमूहर्तशक्तितः॥एकेनाधिस्तास्फुजितवाक्षतीनांजोगःप्रोक्तोकेद्र
धमीनमजेषु॥द्वाभ्यारेवाचाश्विपोगाभिधानेनूनंसर्वरेवयोगाश्वियोगम॥यो
गेन्नयेनयतयोरिग्रहेव्रजंतेक्षेमेनतेगमनमात्रगमंचकुर्युः॥क्षेमजसोरिपु
विनाशमथाश्वियोगेयोगाश्वियोगगमनेयथेष्टरित्री॥दुश्चिक्यरिगतेलाभोया

21

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२॥ यासौम्याचतुर्थ्यम॥त्रिकोणेशुभसंयुक्तेचंद्रेषष्ठाष्टवर्जिते॥विवाहेवर्जय
घुनेमौंजीबंधेतुपंचमम॥गृहकार्येचलिप्तकेयात्रायामष्टमंत्यजेत॥पूर्वस्यां
नैर्ऋत्यवायव्यदिक्षुप्रतिपदादिषु॥योगिनीसन्मुखीवामात्याज्याघातकरीगमे॥इति
योगिनी॥कुर्यान्नदारुत्रिरात्रसंग्रहमंतकासायानेम्तत्सदहनंगृहगोपने
च॥सन्नाविज्ञानमिह्वयंचकेषुकेचिद्वदंतियरतोवसुदेवताद्धीतरविमंद
भौमवारेभद्रातिथिषुत्रिपादकेधिष्ण्ययोगेत्रिपुष्कराख्ये॥द्विपादकेयमलसना
मस्याशुपंचकेपंचगुणितंत्रिगुणंचत्रिपुष्करेयमलेयमलंसर्वहानिष्ठ
द्ध्यादिकमतं॥इतिपंचकत्रिपुष्करादिकलम॥अथनिमित्तशकुनानि॥ ॥२२॥

गृह्यकर्यामसवरांवसान्तस्तरौरौककेवेकपादकाधायमृत्तकेपाविमूश्चि
तैः॥अभ्यक्तकाष्ठास्थिचर्मागारसुबरोगिभिः॥प्रयाणाःसमयेदृष्टेस
र्वसिद्धिर्नजायते॥खरावभीरोविधुभेचरोगीभौमेवनिकचंद्रजमेकवार्ता॥
गुरौकुशासोमगुबलिचक्रीशनौपापाशवप्रगतोप्यनर्थः॥अथोत्तमशकुनानि॥
वामेशवशिवाकुंभेदक्षिणेगोमृगद्विजाः॥सर्वतश्चाषनकुलौससासर्पेन
सर्वतः॥भेरीमृदंगमृदुमर्दलशंखवीणावेदध्वनिर्मधुरमंगलगीतघोषाः॥
पुत्रान्वितापथयुवतिसुरभीसवत्सा धौतांबरस्यरजकोभिमुखप्रशस्ताः॥
दृदंगोर्जितास्त्राकलहामिषकाच्छिनः अथयगात्तरितोमात्रनयह संशकुनं
क्वचित॥पहाङ्हान्तरंगमिध्मिसिम्हान्तरंमृगुः॥सरस्वेपान्दरहाजोवशि

82

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१३

पंचंकेयं वं कृत्तं बुध्वरेत्र यंफलंम मत्सेद्दि तिपम

छोनगराद्दुतिः॥ यत्स्थाने भूमिपासो द्दशाहिवसमन्निव्याप्यनेकत्रतिष्ठे त्सामंतसप्त
रात्रं तद्दितरमनुजः पंचरात्रं तथैव॥ उद्दे गछे कूभाहे स्वपगमनदिनात्सप्तरात्राणि
पूर्वे चाशात्त्ताद्दिने सौरिपुविजयमनामैषु नैनैव कुर्यात्॥ स्वकीयं परकीयवास्त्री
पुरुषमेव च॥ तारयित्वा तु योगश्च तद्दुतं तस्य जीवितम्॥ इति श्री मद्दिवेद गंगारामविरचि
ते रुद्रहतरत्नेपोते यात्राप्रकरणं समाप्तम्॥ तृतीयम् ३॥ अथ गजारोहणम्॥ दस्त्रेंदुश्र
दितिपुष्येषु करादित्रितयेषु च॥ गजकर्माखिलं कार्यं विधेयं स्थिरमेषु च॥ अथाश्वारोहणम्॥
ध्रुवभे चरभे क्षिप्रे मृदुभेषु च वाजिकर्माखिलं कार्यं सूर्यवारे विशेषतः॥ अथ पुनः क्षत्रसे
ना॥ भेशाद्दंष्ट्रज मांग्नि धात्रि शंभिन्न सर्वौद्दितिवीक्ष्यतिः कदुजायिते होभगोर्जमैरवित्वेष्वा १५
ख्यायां माहृतः॥ सक्तोग्नित्वपमित्रइन्दूनि स्वातितोयं च विश्वविविधैः गोविंदोव सैवो सुयाय
चरणाहिवुध्न्यपुषाभिवा॥ उत्तरात्रयं रोहिण्यो भास्करस्य ध्रुवस्थिरम्॥ त्वात्यादित्येश्रुतेः

१२

श्रीणि चंद्रस्त्वाधिचरं च सम्॥ पूर्वात्रयं याम्यमघोग्रमेंद्रक्रूरं कुजस्तथा॥ विशाखाग्नि
भे सौम्ये मिश्रं साधारणोस्मृतम्॥ हस्ताश्विपुष्याभिजितः क्षिप्रं लघुगुरुस्तथा॥ मृ
गान्त्य चित्रा मित्रर्क्षं मृदु मैत्रं भृगुस्तथा॥ मूलेन्द्राद्राहिभं सौरीतीक्ष्णं दारुणसत्तकम्॥
अथ पशुक्रयविक्रयौ॥ पुष्यो भाद्रपदायुग्मं स्वाती चश्रवणाश्विनी॥ हस्तोत्तराम्भोमै
त्रं तथाश्लेषा च रेवती॥ नक्षत्राणि भानि चैतानि क्रयविक्रययोर्बुधैः॥ चंद्रभार्गवजीवास्च
वा राशा कुनमुत्तमम्॥ अथ तैलाभ्यंगः॥ तैलाभ्यंगे रवौ तापो सोमे शोभा कुजे मृतिः॥
बुधे धान्यं गुरौ हानिः शुक्रे दुःखं शनौ शुभः॥ षष्ठाष्टमी भूत विधुक्षयेषु नो सेवेत ना
तैलपलेश्वरं रतम्॥ नाभ्येजनं विश्वदशाद्दिके तिथौ॥ धात्रीफलैः स्नानममद्दिगोव्यवस्त॥
प्रतिपद्दर्श षष्ठीषु नवम्येकादशी रवौ दंतानां काष्ठसंयोगाद्दहते सप्तमे कुले॥ अथ सा
प्यास्य स्त्रीरनिषेधः॥ अभ्यंगात्प्राकारे नात्रे पत्नीपत्युर्न चाहेवे॥ नोभं स्नामे त्कटेम

७३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२५
वितेनैवज्ञानेनोनवमेह्निच॥गंगायांभास्करे क्षेत्रे मातापित्रोर्गुरौमृते॥आधानेसो
मयानेचमरणेनसपूर्णस्मृतः॥मरणेनचोपवासेचसर्वतीर्थक्षयेविधिः॥वर्जयित्वाकु
रुक्षेत्रेनैमिषंपुष्करंगयां॥षण्मासाभ्यंतरेतीर्थेमरणंनतुपुनर्नेहि॥युगादिव्रतिपा
त्रायांमरणंनतुसमाचरेत॥तीर्थान्तरेसमुचितंमरणंमनुरब्रवीत॥संक्रान्त्येशान्सम
भ्यस्यक्षेदयेदंगरुषट्पम॥एवमेवतुनारीणांमरणमनुसमाचरेत॥सिंहकर्कटके चैवक
न्यायांकार्मुकेरवौ॥ओमकरगृहस्नानाधिपतन्त्रासयतेयमः॥नंदाभद्राजयारिक्तापूर्णा
श्चतिथयःक्रमात॥वारत्रयसमावर्तीस्तिथयःप्रतिपन्मुखात॥कनिष्ठमध्येष्ठफलास्तु
शुक्लेतावासदाबुधैः॥उत्तमामध्यमानेष्टाकृष्णपक्षेतुनिश्चितम॥अथतिथीनांसर्व
मतेषुनिर्णयः॥वह्नि१विरंचि२गिरिजा३इगणेश४फणि५पविशाखो६दिनकृत्महेशा॥७॥८॥
दुर्गा९अंतको१०विश्व११हरि१२स्मरश्च१३सर्व१४शशी चेति१५पुराणदृष्टाः॥तिथिस्तु २५

द्विविधाशुद्धामुख्याचसंदेहोनास्तिविद्धानुनिर्णीयते॥प्रथमतःदिनमानसाधनम॥अ
यनादिकवासरानमहतांगंगाणान३लवा५णाशांशकयुक्ता१५२०परिभाजितशून्यरसैर्घटि
का६०मकरादिदिनंकर्कादिनिशा॥तत्रवेधावेधविचार्यव्रतंकुर्यात॥वेधस्तुग्रंथान्तरे
कार्यापूर्वसशस्यते॥अष्टमीनवमीयुक्तानवमीचाष्टमीयुता॥पार्थेयसीमदर्शामीकृती
व्यातुप्रयत्नतःदशम्याआश्विनःशुक्लेनीलकंठस्यदर्शनं॥पदिशेदात्मकल्याणंअथरा
हेविशेषतःहृदेणा॥द्वादशीयुक्ताचतुर्दश्याचपूर्णिमा॥त्रयोदशीपूर्वयुता
कार्यासिद्धियत्नतःस्त्रायुवीःपराःअपुत्राप्रवमेयुवैशोभना॥एकादशी
कलामात्रसैवोपोष्यामहाफलाः॥कदाचिन्मलिनोमासःकदाचिन्मलिनोतिथिः॥
दयोमिलनतुग्राह्यावर्जयित्वाहरेर्दिनं॥अथद्वादश्येकदसीनिर्णयः॥अथविशे

रामहता
नामगु
णिताद्वत्य
र्थ२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२५

अमाह॥ कृते पुनर्वसुऋक्षे पात्रोतापं मैत्रमेव च॥ द्वापरे रेवती प्रोक्ता कलौ श्रवणमी
उच्यते॥ श्रावणी दुर्गानवमी दूर्वा चैव हुताशनी॥ पूर्वविद्धा प्रकर्तव्या शिवरा
त्रिर्बलेर्दिने॥ पूर्वैश्यैकादशी षष्ठी तृतीया च चतुर्दशी॥ चतुर्दशी यरोये तादेवषि
श्रेत थैव च॥ युताशिवाशिवदिने नन्दुप्राप्य दुर्वा रमा दुर्गावत्स हुताशनी वहुलल
यात्स्नू च वरं भोतया॥५१॥ वेधोत्तरभवो द्रिय च भिरयो प्रातर्न्नवा क्षौरहवःयं चा
क्षौरयर पुभात सम यासर्यो दये कीर्तिता॥ गोवर्धनस्य पूजायां मगलं चैव मालि
का॥ जीविधानयुते युशस्य ते युपसेति थो॥ दीपदानं यदा कुर्यात्प्रतिपत्ताभि
श्रितं कुरु॥ त्रिमितत्र बिनस्यति पुजाग्रावो महीयतिः॥ तृतीयाभिश्रितायां च सावि
त्रीयाप्रूजपूरा॥ यम दीदिविधो पूर्व युग्मवाको य रेयता॥ गौर्ध्या चतुर्थी व षष्ठेनयु २५

डगीर्च नं दुर्भरलोपलिसेल्व॥ वत्सस्य पूजा पि वरो वि रैतायताविनषुल्लिनयम
ताका॥१॥ कृष्णाष्टमी स्कंदषष्टी शिवरात्रि चतुर्दशी॥ एता पूर्वयुताः कार्या तिथ्यं
ते पारणं भवेत्॥ दुर्गाष्टमी च नवमी नागपूजा च पंचमी॥ पूर्वसंयोगमासाद्य क
र्तव्या पूर्वा वायरे॥ इति मतांतरे त्वात ॥१२॥ भात्युक्तौ तु कार्या तृतीया सर्वदा बुधैः॥
चतुर्थी नागनना यस्मात् विद्धा प्रशस्यते॥ पंचमी नागपूजायां कार्या षष्ठीस
मन्विता॥ सप्तमी रविपूजायां पूर्वविद्धा प्रशस्यते॥ त्रिमुहूर्तापि तिथि पूर्वापर
स्तेवृजते रविः॥ विज्ञे पारिवस कार्यं युक्त आसातिथिः ता॥ कृष्णाष्टमी स्कंद
षष्ठी सावित्री जीवपुत्रिका पूर्वविद्धा प्रकर्तव्या परविद्धा कदाचन॥ अपयं चयर्वं
प्रमाषावाहः॥ चतुर्दश्यपाष्टमी हुताश्यमावास्या च युरीमा॥ एन्यानियं च

28

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२९

पर्वाणि संक्रांतिदिन पस्यन्च।।भाद्रशेषे मतोऽद्वः स्यादित्येवं मुनिरब्रवीत।।अथ
श्रावणी फाल्गुनिर्णयः।।भाद्रपदे दिनकर्तव्यो श्रावणी फाल्गुनी तथा।।श्राव
णी चन्द्रपं हंति ग्रामं दहति फाल्गुनी।।अथ संवतानयनं।।शाकं शाकैः षष्ठी
र्वह्नि वकः स्यात तसोपं ख्याता दक्षिणे नर्मदायां सोपं नंदैरन्वितः शाकम स्माद
स्मिन्देशे वत्सरः संयुतिश्च त्रिपभूयः स्तुभयान्नाऽस्माभिरलिख्यते।।अथ प्रजन
न मरणासौचनिर्णयः।।अथ तज ननात्सघः अनुजाने सिकीस्मृताः।।त्रिरात्रि
मावृता देशा दशरात्र मतः परं।।मुहूर्त्तं जीवितो बालः यंचत्वं यदि जायते।।पितुः
शुद्धिर्दशाहेन सघः शुद्धिस्तु गोत्रिणाः।।गर्भमध्ये वियति अश्रुवतो यो ख्यितो २९
द्विजः।।यावन्मासस्थितं गर्भं दिनातावत्तु सूतकं।।सावेसौचं समस्तय...न्ने पुत्र

पन्नमप्रदाभवेत।।नवेन्न सध्यते सूतिर्न मृत्या शुध्यते शवः।।गृहणा सद्गुना मृद्धि
र्हद्गुनानेव ततशुरो।।मृतके मृतकं ऽहन्यात् सूतके सूतकं तथा।।अथाधा भागाहद्यं
पावत।।सूतकस्य तु सूतके।।द्वितीये पतिते चाघात्सूतका च्छुद्धिरिष्यते।।पितृ म
रणेषु गीसौचं मिताक्षरा ये।।अजा गाव महिष्या अश्वा ब्राह्मणीव प्रसूतिका।।द
शरात्रे ता शुध्यंति भूमिस्थं च नवोदकं।।अथ जातिशुद्धिनिर्णयः।।शुद्धे विप्रो
द१०शाहे ताद्वा१२दशाहेन भूभृजाः।।वैश्यः पंच१५दशाहेन शूद्रो मासेन शुध्य
ति।।अथ घाणां योगपथे वृत्तेयात् शुद्धिर्गरीयसी।।मरणात्याति योजे वृ गर्भके मार्गे
भवेत।।परतः परतः शुद्धिरवबद्धो विधीयते स्यात्य श्च सप्तमाद्दंः पूर्वे नाप्युत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२८

स्व्यति॥रिवाधानिहतानांचतर्पैवयुाणशस्त्रिरतां॥नदीस्त्रापदंद्भिभ्यःस
घःशौचविधीयते॥मातातरविभेदेणत्र्यहच्चान्येमहर्षयः॥पुत्रेभावेतुय
त्नीस्यात्पत्नीभावेसहोदरः॥तैभावेतुसंप्राप्तस्वकुलेकर्ममाचरेत॥पित्रोरे
कमसौचेस्यात्तदर्द्धमातुदेवहि॥मासात्रयतुभार्यायांतदर्द्धंभ्रातृपुत्रयोः॥अथप्रम
हणनिर्णयः॥मासस्यजन्मनक्षत्रात्षोडशेयदिभास्करः॥अमावास्यादिवाशे
वेसूर्यपर्वतदाभवेत॥कृष्णपक्षेतृतीयायांमासर्क्षेयदिजायते॥ततस्त्रयोदशेवा
न्हिराहुणाग्रसतेरविः॥एकर्क्षेगौरविविधुंतुदगेयदात्तातदृक्षमेकचारेणोन
कुहपुतेन॥चक्रस्पर्शेवसमयेप्रतियत्समेतापूर्वान्हयोगावशापोग्रहणंवदंति॥ २८

भि २

चंद्रात्सप्तमगःसूर्यःचंद्रराहुतदैकताम॥नन्दायोगेपूर्णिमान्ते चंद्रग्रहणसंभवः॥
ग्रस्तोदितौचग्रस्तास्तौचान्यमुपाजनाशकौ॥सर्वग्रस्तौचंद्रसूर्योडिंभराणवृदौ
सर्वगंगासमंतोयंसर्वव्याससमाद्विजाः॥कुरुक्षेत्रेसमंदानंग्रहणेचंद्रसूर्ययोः॥रा
शौयत्रविधुंतुदेनतरणौसोमोथवाग्रस्यतेतस्मादेदधहुताश३रुद्र११दशगा१०कन्या
नराणसयःसामान्यग्रहणसूर्य१२वाणपरसगाः६समान्यमोगप्रदा॥युग्मे२जन्मातु
रेग७मृत्यु०भवनेनेष्टंफलंयच्छति॥ग्रहणग्रहपरिपीडितनाडीनक्षत्रदोषसमा
नाय॥सहसत१००युक्तंस्नायात्फलनिष्फलंचंदनोमितैः॥अथसंक्रांतिनिर्णयः॥
वारेहयं१तिथौरु११द्रवर्णायेचदसेवतु॥एकत्रिंशा३१त्ययंदघात॥रद्वेरद्वेसतैरपि॥का
र्मुकंतुपरित्यज्यमृगेजातिदिवाकरः॥प्रदोषेचार्द्धरात्रेवातदाभोगःपरेहनि॥विषुवत्या

२७

